चीकः, चिचीकयिषुः, चीकः, चिचीकिषुः, चेचीकः ;

चीकयितव्यम् , चिचीकयिषितव्यम् , चीकितव्यम् , चिचीकिषितव्यम्-
चेचीकितव्यम् ;

चीकनीयम् , चिचीकयिषणीयम् , चीकनीयम् , चिचीकिषणीयम् ,
चेचीकनीयम् ;

चीक्यम् , चिचीकयिष्यम् , चीक्यम् , चिचीकिष्यम् , चेचीक्यम् ;

ईषच्चीकः-दुश्चीकः-सुचीकः ;—

चीक्यमानः, चिचीकयिष्यमाणः, चीक्यमानः, चिचीकिष्यमाणः, चेचीक्यमानः;

चीकः, चिचीकयिषः, चीकः, चिचीकिषः, चेचीकः ;

चीकयितुम् , चिचीकयिषितुम् , चीकितुम् , चिचीकिषितुम् , चेचीकितुम् ;

चीकना, चिचीकयिषा, चीका, चिचीकिषा, चेचीका ;

चीकनम् , चिचीकयिषणम् , चीकनम् , चिचीकिषणम् , चेचीकनम् ;

चीकयित्वा, चिचीकयिषित्वा, चीकित्वा, चिचीकिषित्वा, चेचीकित्वा ;

प्रचीक्य, प्रचिचीकयिष्य, प्रचीक्य, प्रचिचीकिष्य, प्रचेचीक्य ;

चीकम् २, } चिचीकयिषम् २, } चीकम् २, } चिचीकिषम् २, }
चीकयित्वा २, } चिचीकयिषित्वा २, } चीकित्वा २, } चिचिकिषित्वा २, }

चेचीकम् २; }
चेचीकित्वा २. }

(530) " चीभृ कत्थने " (I-भ्वादिः-384. सक. सेट्. आत्म.)

चीभकः-भिका, चीभकः-भिका, चिचीभिषकः-षिका, चेचीभकः-भिका;

चीभिता-त्री, चीभयिता-त्री, चिचीभिषिता-त्री, चेचीभिता-त्री ;

— चीभयन्-न्ती, चीभयिष्यन्-न्ती-ती ; —

चीभमानः, [1]चीभयमानः, चिचीभिषमाणः, चेचीभ्यमानः ;

चीभिष्यमाणः, चीभयिष्यमाणः, चिचीभिषिष्यमाणः, चेचीभिष्यमाणः;

चीप्-चीब्-चीभौ-चीभः; — — —

---

1. धातोरकर्मकत्वे, ' अणावकर्मकाच्चित्तवत्कर्तृकात् ' (1-3-88) इति ण्यन्तात् परस्मैपदमेव । सकर्मकत्वे तु आत्मनेपदमपि भवति ।